कार्त्तिके दीपदानेन यस्तोषयति केशवम् ।
मुक्तिं प्राप्स्यामहे नूनं प्रसादाच्चक्रपाणिनः” ॥
किञ्च ।
“मेरुमन्दरमात्राणि कृत्वा पापान्यशेषतः ।
दह्यते नात्र सन्देहो दीपदानात्तु कार्त्तिके ॥
गृहे वायतने वापि दीपं दद्याच्च कार्त्तिके ।
पुरतो वासुदेवस्य महाफलविधायिनः ॥
स जातो मानुषो लोके स धन्यः स च कीर्त्तिमान् ।
प्रदत्तः कार्त्तिके मासि दीपो वै मधुहाग्रतः ॥
निमिषार्द्धार्द्धमात्रेण दीपदानेन कार्त्तिके ।
न तत् क्रतुशतैः प्राप्यं फलं तीर्थशतैरपि ॥
सर्व्वानुष्ठानहीनोऽपि सर्व्वपापरतोऽपि सन् ।
पूयते नात्र सन्देहो दीपं दत्त्वा तु कार्त्तिके ॥
तन्नास्ति पातकं किञ्चित् त्रिषु लोकेषु नारद ! ।
यन्न शोधयते दीपः कार्त्तिके केशवाग्रतः ॥
पुरतो वासुदेवस्य दीपं दत्त्वा तु कार्त्तिके ।
प्राप्नोति शाश्वतं स्थानं सर्व्वाबाधाविवर्ज्जितम् ॥
यः कुर्य्यात् कार्त्तिके मासि कर्पूरेण तु दीपकम् ।
द्वादश्याञ्च विशेषेण तस्य पुण्यं वदामि ते ॥
कुले तस्य प्रसूता ये ये भविष्यन्ति नारद ! ।
समतीताश्च ये केचिद् येषां सङ्ख्या न विद्यते ॥
क्रीड़ित्वा सुचिरं कालं देवलोके यदृच्छया ।
ते सर्व्वे मुक्तिमायान्ति प्रसादाच्चक्रपाणिनः” ॥
किञ्च ।
“घृतस्थानेन विप्रेन्द्र ! कार्त्तिके केशवालयम् ।
द्योतयेद् यो महाभाग ! पुनात्यासप्तमं कुलम् ॥
कार्त्तिके दीपदानन्तु कुर्य्याद् यो वैष्णवालये ।
धनं पुत्त्रो यशः कीर्त्तिर्भवेत्तस्य च सर्व्वदा ॥
यथा च मथनाद्वह्निः सर्व्वकाष्ठेषु दृश्यते ।
तथा च दृश्यते धर्म्मो दीपदाने न संशयः” ॥
किञ्च ।
“निर्द्धनेनापि विप्रेन्द्र ! कृत्वा चैवात्मविक्रयम् ।
कर्त्तव्यं दीपदानन्तु यावत् कार्त्तिकपूर्णिमा ॥
वैष्णवो न स मन्तव्यः संप्राप्ते कार्त्तिके मुने ! ।
यो न यच्छति मूढ़ात्मा दीपं केशवसद्मनि” ॥
नारदीये श्रीरुक्माङ्गदमोहिनीसंवादे ।
“एकतः सर्व्वदानानि दीपदानानि चैकतः ।
कार्त्तिके न समं प्रोक्तं दीपदो ह्यधिकः स्मृतः” ॥
पाद्मे च तत्रैव ॥
“कार्त्तिके खण्डदीपं यो ददाति हरिसन्निधौ ।
दिव्यकान्तिविमानाग्रे रमते स हरेः पुरे” ॥ * ॥
अथ तत्र परदीपप्रबोधनमाहात्म्यम् ।
स्कान्दे तत्रैव ।
“पितृपक्षेऽन्नदानेन ज्यैष्ठाषाढ़े च वारिणा ।
कार्त्तिके तत् फलं पुंसां परदीपप्रबोधनात् ॥
बोधनात् परदीपस्य वैष्णवानाञ्च सेवनात् ।
कार्त्तिके फलमाप्नोति राजसूयाश्वमेधयोः ॥
दीयमानन्तु ये दीपं बोधयन्ति हरेर्गृहे ।
परेण नृपशार्दूल ! निस्तीर्णा यमयातना ॥
न तद्भवति विप्रेन्द्र ! इष्टैरपि महामखैः ।
कार्त्तिके यत् फलं प्रोक्तं परदीपप्रबोधनात् ॥
एकादश्यां परेद्दत्तं दीपं प्रज्वाल्य मूषिका ।
मानुष्यं दुर्ल्लभं प्राप्य परां गतिमवाप सा” ॥ * ॥
अथ शिखरदीपमाहात्म्यम् ।
स्कान्दे तत्रैव ।
“यदा यदा भासयते दीपकः कलसोपरि ।
तदा तदा मुनिश्रेष्ठ ! द्रवते पापसञ्चयः ॥
यो ददाति द्विजातिभ्यो महीमुदधिमेखलाम् ।
हरेः शिखरदीपस्य कलां नार्हति षोड़शीम् ॥
यो ददाति गवां कोटिं सवत्सां क्षीरसंयुताम् ।
हरेः शिखरदीपस्य कलां नार्हति षोड़शीम् ॥
सर्व्वस्वदानं कुरुते वैष्णवानां महामुने ! ।
शिखरोपरि दीपस्य कलां नार्हति षोड़शीम्” ॥
किञ्च ।
“यः करोति परं दीपं मूल्येनापि महामुने ! ।
शिखरोपरि मध्ये च कुलानां तारयेच्छतम् ॥
विमानं ज्योतिषा दीप्तं ये निरीक्षन्ति कार्त्तिके ।
केशवस्य महाभक्त्या कुले तेषां न नारकी ॥
दिवि देवा निरीक्षन्ते विष्णुदीपप्रदं नरम् ।
कदा भविष्यत्यस्माकं सङ्गमः पुण्यकर्म्मणा ॥
कार्त्तिके कार्त्तिकीं यावत् प्रासादोपरि दीपकम् ।
यो ददाति मुनिश्रेष्ठ ! तस्येन्द्रत्वं न दुर्ल्लभम्” ॥ * ॥
अथ तत्र दीपमालामाहात्म्यम् ।
स्कान्दे तत्रैव ।
“दीपपङ्क्तेश्च रचनां सवाह्याभ्यन्तरे हरेः ।
विष्णोर्विमाने कुरुते स नरः शङ्खचक्रधृत् ॥
दीपपङ्क्तेश्च रचनां कुरुते केशवालये ।
तस्यालये प्रसूतानां लक्षाणां नरकं न हि ॥
विष्णोर्व्विमानं दीपाढ्यं सवाह्याभ्यन्तरे मुने ! ।
दीपोद्यतकरे मार्गे तेन प्राप्तं परं पदम्” ॥
भविष्ये च ।
“यः कुर्य्यात् कार्त्तिके मासि शोभनां दीपमालिकाम् ।
प्रबोधे चैव द्वादश्यामेकादश्यां विशेषतः ॥
सूर्य्यायतप्रकाशस्तु तेजसा भासयन् दिशः ।
तेजोराशिविमानस्थो जगदुद्योतयंस्त्विषा ॥
यावत्प्रदीपसङ्ख्या तु घृतेनापूर्य्य बोधिता ।
तावद्वर्षसहस्राणि विष्णुलोके महीयते” ॥ * ॥
अथ आकाशादिदीपमाहात्म्यम् ।
पाद्मे तत्रैव ।
“उच्चैः प्रदीपमाकाशे यो दद्यात् कार्त्तिके नरः ।
सर्व्वं कुलं समुद्धृत्य विष्णुलोकमवाप्नुयात् ॥
विष्णुकेशवमुद्दिश्य दीपं दद्यात्तु कार्त्तिके ।
आकाशस्थं जलस्थञ्च शृणु तस्यापि यत्फलम् ॥
धनं धान्यं समृद्धिश्च पुत्त्रवानीश्वरो गृहे ।
लोचने च शुभे तस्य विद्वानपि च जायते” ॥
किञ्च ।
“विप्रवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः ॥
चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ॥
दीपदानाद्धि सर्व्वत्र महाफलमवाप्नुयात्” ॥ * ॥
आकाशदीपदानमन्त्रः । तत्रैव ।
“दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे” ॥
अथ देशविशेषे कार्त्तिकमाहात्म्यविशेषः ॥
पाद्मे तत्रैव ।
“यत्र कुत्रापि देशेऽयं कार्त्तिकः स्नानदानतः ।
अग्निहोत्रसमफलः पूजायाञ्च विशेषतः ॥
कुरुक्षेत्रे कोटिगुणो गङ्गायाञ्चापि तत्समः ।
ततोऽधिकः पुष्करे स्याद्द्वारकायाञ्च भार्गव ! ॥
कृष्णसालोक्यदो मासः पूजास्नानैश्च कार्त्तिकः ।
अन्याः पूर्य्यस्तत्समाना मुनयो मथुरां विना ॥
दामोदरत्वं हि हरेस्तत्रैवासीद्यतः किल ।
मथुरायां ततस्तोर्ज्जो वैकुण्ठप्रीतिवर्द्धनः ।
कार्त्तिको मथुरायां वै परमावधिरिष्यते ।
यथा माघे प्रयागः स्याद्वैशाखे जाह्नवी यथा ॥
कार्त्तिके मथुरा सेव्या ततोत्कर्षः परो न हि ॥
मथुरायां नरैरूर्ज्जे स्नात्वा दामोदरोऽर्च्चितः ।
कृष्णरूपा हि ते ज्ञेया नात्र कार्य्या विचारणा ॥
दुर्ल्लभः कार्त्तिको विप्र ! मथुरायां नृणामिह ।
यत्रार्च्चितः स्वकं रूपं भक्तेभ्यः संप्रयच्छति ॥
भुक्तिं मुक्तिं हरिर्द्दद्यादर्च्चितोऽन्यत्र सेविनाम् ।
भक्तिञ्च न ददात्येष यतो वश्यकरी हरेः ॥
सा त्वञ्जसा हरेर्भक्तिर्लभ्यते कार्त्तिके नरैः ।
मथुरायां सकृदपि श्रीदामोदरपूजनात् ॥
मन्त्रद्रव्यविहीनञ्च विधिहीनञ्च पूजनम् ।
मन्यते कार्त्तिके देवो मथुरायां सदर्च्चनम् ॥
यस्य पापस्य युज्येत मरणान्ता हि निष्कृतिः ।
तच्छुद्ध्यर्थमिदं प्रोक्तं प्रायश्चित्तं सुनिश्चितम् ।
कार्त्तिके मथुरायां वै श्रीदामोदरपूजनम् ॥
कार्त्तिके मथुरायां वै पूजनाद्दर्शनं ध्रुवः ।
शीघ्रं संप्राप्तवान् बालो दुर्ल्लभं योगतत्परैः ॥
सुलभा मथुरा भूमौ प्रत्यब्दं कार्त्तिकस्तथा ।
तथापि संसरन्तीह नरा मूढ़ा भवाम्बुधौ ॥
किं यज्ञैः किं तपोभिश्च तीर्थैरन्यैश्च सेवितैः ।
कार्त्तिके मथुरायाञ्चेदर्च्यते राधिकाप्रियः ॥
यानि सर्व्वाणि तीर्थानि नदा नद्यः सरांसि च ।
कार्त्तिके निवसन्त्यत्र माथुरे सर्व्वमण्डले ॥
कार्त्तिके जन्मसदने केशवस्य च ये नराः ।
सकृत्प्रविष्टाः श्रीकृष्णं ते यान्ति परमव्ययम् ॥
परोपहासमुद्दिश्य कार्त्तिके हरिपूजया ।
मथुरायां लभेद्भक्तिं किं पुनः श्रद्धया नरः” ॥ इति ॥
“इत्थं कार्त्तिककृत्यानि व्यक्तान्येव स्वतोऽभवन् ।
तत्र किञ्चिद्विशेषेण तद्विधिर्लिख्यतेऽधुना” ॥ * ॥
अथ कार्त्तिककृत्यविधिः । तत्रोपक्रमकालश्चोक्तः
श्रीकृष्णसत्यासंवादीयकार्त्तिकमाहात्म्ये ।
“आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः ॥
नित्यं जागरणायान्ते यामे रात्रेः समुत्थितः ।
शुचिर्भूत्वा प्रबोध्याथ स्तोत्रैर्नीराजयेत् प्रभुम् ॥
निशम्य वैष्णवान् धर्म्मान् वैष्णवैः सह हर्षितः ।
कृत्वा गीतादिकं प्रातर्देवं नीराजयेत् पुनः ॥
नद्यादौ च ततो गत्वाचम्य सङ्कल्पमाचरेत् ।
प्रभुं प्रार्थ्याथ तस्मै च दद्यादर्घ्यं यथाविधि ॥
तत्र सङ्कल्पमन्त्रः ।
“कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ! ।